**अर्द्धदेव** पु० अर्द्धे समीपे तद्वर्त्ती देवानाम्। देवसमीपे वर्त्तमाने। "इन्द्रं न वृत्रतुरमर्द्धदेवम्" "इलवृषणं ददथुरर्द्धदेवम्" ऋ० १,४२,८,६। "अर्द्धदेवं देवानामर्द्धे समीपे वर्त्तमानम्" भा०

**अ(आ)र्द्धद्रौणिक** त्रि० अर्द्धद्रोणमर्हति ठञ्। उत्तरपदस्य वृद्धिः पूर्व्वस्य वा। अर्द्धद्रोणपरिमाणार्हे वस्तुनि स्त्रियां ङीप्।

**अर्द्धधार** न० अर्द्धे धाराऽस्य। सुश्रुतोक्ते विंशतिशस्त्रमध्ये शस्त्रभेदे "विंशतिः शस्त्राणि। तद्यथा। मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीमुखकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चककुठारिकाव्रीहिमुखारावेतसपत्त्रवड़िशदन्तशङ्क्वेषण्य" इति। "वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रार्द्धधाराणि छेदने भेदने च" सुश्रु०।

**अर्द्धनारायण** न० अर्द्धमर्द्धमितं स्थानं यस्य तादृशो नारायणो यत्र "प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम्। अत्र नारायणः स्वामी नान्यः स्वामी कथञ्चन" इत्युक्ते गङ्गायाः प्रवाहावधिहस्तचतुष्टयात्मके नारायणस्वामिके स्थाने।

**अर्द्धनारीश्वर** पु० अर्द्धाङ्गे या नारी तस्या ईश्वरः। हरगौरीरूपे शिवमूर्त्तिभेदे तद्रूपादि ध्यानशब्दे वक्ष्यते।

**अर्द्धनाव** न० अर्द्धं नावः अच् समा०। नौकायास्तुल्यांशे।

**अर्द्धनिशा** स्त्री अर्द्धं निशायाः एकदेशित०। अर्द्धरात्रे।

**अर्द्धपण** पु० अर्द्धं पणस्य। "वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणश्चतस्रः" इत्युक्तपणस्यार्द्धे काकिणीद्वये।

**अर्द्धपथ** न० अर्द्धं पथः अच् समा०। मार्गस्य तुल्यांशे प्रदेशे।

**अर्द्धपाञ्चालिक** पु० अर्द्धपञ्चाले भवः ठण् उत्तरपदवृद्धिः। अर्द्धपञ्चालदेशभवे।

**अ(आ)र्द्धपादिक** त्रि० अर्द्धपादं तच्छेदमर्हति ठञ्। पूर्व्वपदस्य वा वृद्धिः। अर्द्धपादच्छेदार्हे। "गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने। पशूनां हरणे चैव दण्डः कार्य्योऽर्द्धपादिकः" मनुः अर्धपदं मर्हति ठञ् उत्तरपदस्य वृद्धिः पूर्व्वपदस्य वा। अर्द्धपदप्रमाणार्हे उभयत्र स्त्रियां ङीप्। [पोते (तित्तिरीति) ख्याते पक्षिणि।

**अर्द्धपारावत** पु० अर्द्धेन अङ्गेन पारावत इव। चित्रकण्ठक।

**अर्द्धपुलायित** न० "शताद्द्धार्द्धक्रमादूनैर्मण्डलायितवल्गितैः। उन्मुखस्याश्वमुख्यस्य गतिरर्द्धपुलायितमिति" परिभाषिते अश्वगतिभेदे।

**अ(आ)र्द्धप्रस्थिक** त्रि० अर्द्धप्रस्थमर्हति ठञ् "नातः" पा० नोत्तरपदस्य वृद्धिः पूर्व्वस्य तु वा। अर्द्धप्रस्थप्रमाणार्हे स्त्रियां ङीप्।

**अर्द्धभाग** पु० अर्द्धं भागस्य। भागस्यार्द्धे "तदर्द्धभागेन लभस्व काङ्क्षितम्" कुमा०। अर्द्धभागमर्हति ठञ् वा पूर्वपदवृद्धिः। अ(आ)र्द्धभागिकः। अर्द्धभागार्हे त्रि० "जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत्। मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिकम्" या० स्मृतिः।

**अर्द्धभाज्** त्रि० भज—ण्वि उप० स०। अर्द्धांशहरे "निधीनां तु पुराणां च धातूनामेव च क्षितौ। अर्द्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः" मनुः।

**अर्द्धभ्रम** न० अर्द्धात् भ्रमोभ्रमणं यत्र। "आहुरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदीति सर० कण्ठा० उक्ते शब्दालङ्कारभेदे यथा "स स त्व र ति दे नि त्यं
स द रा म र्ष ना शि नि।
त्व रा धि क क सं ना दे
र म क त्व म क र्षि ति" किरा०

अग्निपुराणे तु "गोमूत्रिकार्द्धभ्रमके" इति कान्ततया पठित्वा "पादार्द्धाद्यैश्चतुर्भिश्च कुर्य्याद्विन्यासमेतयोः। न्यस्यतामिह वर्णं नामधोधः भ्रमभागिणाम्। अधोधःस्थितवर्णानामाचतुर्थपदं नयेत्। तुर्य्यपादं नयेदूर्द्धं पादार्द्धप्रातिलोम्यत" इति तल्लक्षणमुक्तम्। अयमर्थः तिर्य्यग्गताः पञ्चरेखाः ऊर्द्ध्वगताश्च नव रेखालेख्या एवं द्वात्रिंशत् कोष्ठानि भवन्ति तत्र प्रथमादिपङ्क्तिक्रमेण एकैककोष्ठगैकाक्षरकाश्चत्वारः पादाः क्रमेण पङ्क्तिचतुष्के लेख्याः एवं लेखने द्वात्रिंशद्वर्णा एकैककोष्ठगा भवन्ति। तत्र प्रथमपादार्द्धगता आद्याश्चत्वारोवर्णाः क्रमशोऽधोवर्त्तिनीषु प्रथमादिपङ्क्तिषु यथा भवन्ति यथा च तस्यापरार्द्धगताश्चत्वारो वर्णा अन्तिमादिपङ्क्तिषु ऊर्द्धोर्द्धक्रमेण अन्त्यकोष्ठगा भवन्ति तथा वर्णाः श्लोके निवेश्याः। एवं द्वितीयपादार्धगा आद्याश्चत्वारो वर्णा अधोऽधःक्रमेण प्रथमादिपङ्क्तिद्वितीयकोष्ठगाः अपरार्धघटकाश्चत्वारश्च वर्णा ऊर्द्ध्वोर्द्ध्वक्रमेण अन्तिमादिपङ्क्तिषु सप्तमकोष्ठगाः। तृतीयपादार्धगाः आद्याश्चत्वारो वर्णाः प्रथमादिपङ्क्तिषु अधोऽधःक्रमेण तृतीयकोष्ठगा उत्तरार्धगाश्चत्वारो वर्णाश्च ऊर्द्ध्वोर्द्ध्वक्रमेण अन्तिमादिषु षष्ठकोष्ठगाः चतुर्थपादार्धगा आद्याश्चत्वारोवर्णाः अधोधःक्रमेण प्रथमादिषु पङ्क्तिषु चतुर्थकोष्ठगाः उत्तरार्धगताश्चत्वारो वर्णाश्च ऊर्द्ध्वोर्द्ध्वक्रमेण अन्तिमादिषु पञ्चमकोष्ठगाः यथा भवेयुस्तथा वर्णविन्यासो विधेयः। एवं सति यथा प्रथमादिपङ्क्तिक्रमेण चत्वारः पादाः पठितुं शक्यन्ते एवमुक्तप्रकारेण अधोधःक्रमेण च प्रथमादिकोष्ठगवर्णग्रहणेन एवं अन्तिमादिषु ऊर्द्ध्वोर्द्ध्वक्रमेण अन्तिमकोष्ठस्थवर्णग्रहणेन, उक्तरीत्या प्रथमादिपङ्क्तिषु द्वितीयादिकोष्ठस्थवर्णग्रहणेन